"सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह ।
तेनेदं निर्म्मितं पूर्व्वं पुरैव हस्तिनापुरम् ॥
हस्तिनश्चैव दायादास्त्रयः परमधार्म्मिकाः ।
अजमीढो द्विमीढश्च पुरुमीढस्तथैव च ॥"
इति हरिवंशे पितृकल्पे २० अध्यायः ॥ * ॥

अजमोदा । इति राजनिर्घण्टः ॥ ( हस्तोऽस्यास्तीति । हस्त + इनिः ।) स्थलपशुविशेषः । हाती इति भाषा । तत्पर्य्यायः । दन्ती २ दन्तावलः ३ द्विरदः ४ अनेकपः ५ द्विपः ६ मतङ्गजः ७ गजः ८ नागः ९ कुञ्जरः १० वारणः ११ करी १२ इभः १३ स्तम्बेरमः १४ पद्मी १५ । इत्यमरः । २ । ८ । ३४ ॥ मतङ्गः १६ मातङ्गः १७ पीलुः १८ वराङ्गः १९ पुष्करी २० वनयाङ्गः २१ महामृगः २२ स्तरमः २३ शूर्पकर्णः २४ सिन्धुरः २५ सामजः २६ कटी २७ अन्तःस्वेदः २८ दीर्घमारुतः २९ विलोमजिह्वः ३० करटी ३१ पिण्डपादः ३२ महामदः ३३ पेटकी ३४ कटकी ३५ कुम्भी ३६ निर्झरः ३७ । इति शब्दरत्नावली ॥ सिन्दूरतिलकः ३८ पद्मनखः ३९ शृङ्गारी ४० करेणुः ४१ कर्णिकी ४२ शृङ्गी ४३ सामयोनिः ४४ । इति जटाधरः ॥ राजीवः ४५ जलकाङ्क्षः ४६ जलालकः ४७ पेचिलः ४८ । इति त्रिकाण्डशेषः ॥ द्विरदनः ४९ करभी ५० विषाणी ५१ रदनी ५२ महाबलः ५३ भद्रः ५४ द्रुमारिः ५५ षष्टिहायनः ५६ । इति राजनिर्घण्टः ॥ * ॥ स च चतुर्ज्जातिर्यथा,—
"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ॥"
इति हेमचन्द्रः ॥ * ॥

तदारोहणगुणाः । वातकोपनत्वम् । अङ्गदार्ढ्यमग्निकारित्वञ्च । इति राजवल्लभः ॥ * ॥
कामुकीभूतगजारोहणदोषो यथा ।
"नारोहेत् कामुकीभूतं गजं राजा कदाचन ।
आरूढ्य कामुकं तन्तु परत्रेह विषीदति ॥"
इति कालिकापुराणे ८९ अध्यायः ॥ * ॥

अथ गजायुर्व्वेदः ।
"गजायुर्व्वेदमाख्यास्ये उक्ताः लक्ष्या गजे हिताः ।
गजे चतुर्गुणा मात्रा ताभिर्गजविवर्द्धनम् ॥
गजोपसर्गव्याधीनां शमनं शान्तिकर्म्म च ।
पूजयित्वा सुरान् विप्रान् ब्राह्मणे कपिलां ददेत् ॥
दन्तिदन्तद्वये मालां निबध्नीयादुपोषितः ।
मन्त्रेण मन्त्रिता वैद्यो यथा विचार्य्यकामतः ॥
सूर्य्याद्याः शिवदुर्गा श्रीर्विष्णुना रक्षणाय च ।
बलिं दद्याच्च भूतेभ्यः स्नापयेच्च चतुर्घटैः ॥
भोजनं मन्त्रितं दद्यात् भक्षणीयन्नवीकृतम् ।
भूती रक्षा शुभा लक्ष्मा वारुणी रक्षणी सदा ॥
त्रिफला पञ्चकोली च दशमूलं विडङ्गकम् ।
शतावरी गुडूची च निम्बवासकवर्त्तिकाः ॥
गजरोगविनाशाय प्रोक्तः क्वाथः कषायकः ।
आयुर्व्वेदो गजाख्यानामुक्तः संक्षेपतस्ततः ॥"
इति गारुडे । २०७ । ३६—४२ ॥ * ॥ गजे वर्ज्जनीयानि यथा,—

"गजे स्वच्छयोषित्वसुबलं कर्णचापलम् ।
अरिव्यूहविभेदित्वं कुम्भमुक्तामलादयः ॥"
इति कविकल्पलतायां १ स्तवके २ कुसुमम् ॥ * ॥
तच्छकुनानि यथा ।

"जङ्घं करं यः कुरुतेऽथवा यो
धत्ते करं दक्षिणदन्तभागे ।
यो वा भवेत् बृंहितपूरिताशः
करी भवेदभ्यगपूरिताशः ॥"

इति वसन्तराजशाकुने चतुष्पदशाकुनम् ॥ * ॥
स च प्रजापतिदैवतकः । यथा विष्णुधर्म्मोत्तरे ।
"अभयं सर्व्वदैवत्यं भूमिर्वै विष्णुदेवता ।
कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः ।
प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः ॥"
इत्यादि ॥ * ॥
तस्य प्रतिग्रहे आग्नेयञ्च याम्यम् । यथा ।
"करी रथस्तथा कन्या दासदास्यौ द्विजोत्तमाः ।
करन्तु यदि विन्यस्य अपर्णो ज्ञेयः प्रतिग्रहः ।
आग्नेयञ्च गजस्योक्तः कर्णे याम्यश्च कीर्त्तितः ॥"
इत्यादि ॥ * ॥
प्रतिग्रहाशक्तेन तदग्राह्यम् । यथा, ब्रह्मपुराणम् ।
"ब्राह्मणः प्रतिगृह्णीयाद्धस्त्यश्वं साधुतस्तथा ।
अश्वमपि मातङ्गतिलकौ चाव वर्ज्जयेत् ॥"
इत्यादि ॥
तद्दानफलम् । यथा नन्दिपुराणम् ।
"योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत् ।
स शक्रस्य वसेल्लोके शक्रतुल्यो युगान् दश ।
प्राप्यान्ते चैव मानुष्यं राजा भवति बुद्धिमान् ॥"
इति दानतत्त्वम् ॥ * ॥
अपि च ।
"गामश्वञ्च महीं हेम मणीमय गजान्विताम् ।
ये प्रयच्छन्ति पर्व्वसु निरताः सर्व्वदा मुने ।
न तेषां रौरवः पन्था दर्शनं दानमिश्रुत ॥"
इति वह्निपुराणे यमधर्म्मिकोपाख्याननामाध्यायः ॥ * ॥ अथ गजपरीक्षा । तत्र पालः ।

"ऐन्द्रमिश्ररथानिलसुधा-
चन्द्रतोयरविमारिजितारे ।
सूर्य्यशक्रगुरुसोमकवारे
श्रेयसि भवति कुञ्जरयानम् ॥
लग्ने चरे शुभसमाश्रितवीक्षिते वा
चन्द्रस्य हरिरिभयानविधौ विशस्ता ।
सौम्ये दिने चरनिभाटचतुष्टयस्थ-
तोयमैत्रमदितिश्च शुभप्रचारः ॥
स्यात् कुञ्जरस्य पदमर्दनदानकालः
शीर्षेषु दुःखफलमाकुंतनेऽह्नि चैव ॥
गजानामष्टधा भेदाः संक्षेपेण प्रकाश्यते ।
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः ।
एषां वंशप्रसूतानां गजानामष्टजातयः ॥
ये कुञ्जराः पाण्डुरसर्व्वदेहाः
सुदीर्घदन्ताः सितपुष्पदन्ताः ।
अलोमशा अल्पभुजो बलाढ्या
महाप्रमाणा लघुपुष्टलिङ्गाः ॥
क्रुद्धाः समीके मृदवोऽन्यकाले
लघ्वम्बुपाना बहुलोपदानाः ।
विस्तीर्णदानाग्रतनुलोमपुच्छा
ऐरावतस्याभिजनप्रसूताः ॥
तेष्वेव सर्व्वेषु विशुद्धवर्णा
अतीवहृष्टाः प्रभवन्ति सुताः ।
नाग्येन पुष्ठेन महीपतीनां
रक्षन्ति भूमण्डलमध्यमेते ।
दन्ता विभग्ना अपि युद्धरङ्गे
पुनः प्ररोहन्ति पुरेव तेषाम् ॥ १ ॥
ये कुञ्जराः कोमलसर्व्वदेहाः
पुष्टा न दक्षाः खरगण्डदेशाः ।
अवप्रदाः सन्ततरोषभाजोऽ-
मरप्रियाः सर्व्वभुजो बलाढ्याः ॥
सुतीक्ष्णदन्ता रसना गजानां
ते पुण्डरीकप्रवरप्रसूताः ।
ते पद्मगन्धं विसृजन्ति रेतो
दानञ्च तेषां वमथुः प्रभूता ॥
न तोयपानेऽभ्यधिका स्पृहा च
श्रमेऽपि नैते बलमुत्सृजन्ति ।
यस्मी तु येषां निवसन्ति राज्ञां
ते वै समस्तक्षितिशासनार्हाः ॥ २ ॥
ये कुञ्जराः खर्व्वसवर्णदेहाः
कदापि नाश्नन्ति गलप्रदाश्च ।
आहारयोगाद्बलवीर्य्यभाजो
नात्यम्बुकामा बहुलोमगण्डाः ।
विरूपदन्तास्तनुपुच्छकर्णा
ज्ञेया अधर्व्वामनवंशजाताः ॥ ३ ॥
ये दीर्घदेहास्तनुदीर्घगण्डाः
सुदन्तभाजो मदपूर्णदेहाः ।
अविद्धगण्डाः कलहप्रियाश्च
ते कुञ्जराः स्युः कुमुदस्य वंशाः ।
अन्यद्विपान् दर्शनमात्रतस्तु
निघ्नन्ति ते दुर्गमनाश्च पुंसाम् ॥ ४ ॥
ये स्निग्धदेहाः सलिलाभिलाषा
महाप्रमाणास्तनुगण्डदन्ताः
अविद्धदन्ताः श्रमदुःसहाश्च
ते कुञ्जराश्चाञ्जनवंशजाताः ॥ ५ ॥
रेतश्च दानञ्च सृजन्ति मन्द-
दानूपदेशे प्रभवन्ति ये तु ।
ते पुष्पदन्ताभिजनप्रसूता
महाजवाश्चो तनुपुच्छभागाः ॥ ६ ॥
सुदीर्घदन्ता बहुलोमभाजो
महाप्रमाणाश्च सुकर्णमात्राः ।
श्राम्यन्ति नाध्वश्रमणाभियोगा-
दाहारपानादिषु चातिमत्ताः ॥
महप्रदेशे विचरन्ति ते वै
सुमाखलानामिव जन्म मध्ये ।
महाप्रतीतातिसुकार्य्यपात्रा
नातिह्रदन्ता मृदुगूढदन्ताः ॥